उपदेष्टारः सदसदतां कौशिकाः, प्रज्ञा शकुनिज्ञानम् , परिचिताः श्वानः राज्यं शून्याटवीषु, आपानकमुत्सवः.........यस्मिन्नेव कानने निवसन्ति तदेवोतखात मूलमशेषतः कुर्वन्ति।

7. ससन्दर्भ व्याख्या कार्या-

अस्तमुपगते च भगवति सहस्रदीधितावपरार्णवतटात् उल्लसन्ती विद्रुमलतेव पाटलासन्ध्या समदृश्यत। यस्यामाबध्यमानध्यानम् एकदेशदुह्यमान होम-धेनु दुग्धधारा ध्वनितधन्यतरातिमनोहरम् अग्नि-हो प्रवेदि विप्रकीर्यमाणहरितकुशम् ऋषिकुमारिका-भिरितस्ततो विक्षिप्यमाण दिग्देवतार्चन बलिसिक्थम् आश्रमपदमभवत् ।

**चतुर्थ वर्गः** 15

8. 'वाणोच्छिष्टम् जगत्सर्वम्' इत्युक्तिः विवेचनीया।

9. चाण्डालकन्यायाः स्वरूपं वर्ण्यताम् ।



**A** **(Printed Pages 4)**

**Roll No.____________**

# A- 254

## शास्त्रितृतीयवर्षपरीक्षा, 2015

### ऐच्छिकविषयः (साहित्यम् )

### कादम्बरी (पूर्वार्द्धभाग)

### द्वितीयप्रश्नपत्रम्

**समयावधिः : घण्टात्रयम्** **सपूर्णाङ्काः : 100**

**निर्देश :** प्रथमः प्रश्नोऽनिवार्यः। प्रतिवर्गमेकः प्रश्नोऽवश्यं समाधेयः।

1. अधोलिखितेषु टिप्पणी लेख्या : 4×10=40

(क) महाकविबाणभट्टः।

(ख) बाणभट्टस्य समयः।

(ग) बाणभट्टस्य कृतयः।

(घ) महाश्वेता ।

(ङ) जाबाल्याश्रमस्य वर्णनम् ।

(च) आख्यायिका।

(छ) कादम्बरीकथायाः वैशिष्ट्यम् ।

(ज) कादम्बर्याः अङ्गीरसः।

(झ) विन्ध्याटवी वर्णनम् ।

(ञ) चन्द्रापीडः।

**प्रथम वर्गः** 15

2. छन्दोलंकार निरूपणपूर्वकमस्य श्लोकस्य व्याख्या कार्या-

अकारणाविष्कृतवैरदारूणाद-

सज्जनात् कस्य भयं न जायते।

विषं महाहेरिव यस्य दुर्वचः,

सुदुःसहं सन्निहितं सदामुखे।।

3. ससन्दर्भ व्याख्या कार्या-

यश्च मनसि धर्मेण, कोपे यमेन, प्रसादे धनदेन, प्रतापे वह्निना, भुजे भुवा, दृशिश्रिया, वाचि सरस्वत्या, मुखे शशिना, वले मरूता, प्रज्ञायां सुरगुरूणा, रूपे मनसिजेन, तेजसि सवित्रा च वसता सर्वदेवमयस्य प्रकटित विश्वरूपाकृतेरनुकरोति भगवतो नारायणस्य।

**द्वितीय वर्गः** 15

4. ससन्दर्भ व्याख्या कार्या-

देव! विदित सकलशास्त्रार्थः, राजनीतिप्रयोगकुशलः पुराणेतिहासकथालापनिपुणः, वेदितागीतश्रुतीनाम् ,





काव्यनाटकाख्यानक प्रभृतीनामपरिमितानां सुभाषितानामध्येता स्वयञ्च कर्ता, परिहासलापपेशलः, वीणावेणुमुरज प्रभृतीनां वाद्यविशेषाणामसमः श्रोताः, नृत्यप्रयोगदर्शन निपुणः चित्रकर्मणि प्रवीणः, द्यूतव्यापारे प्रगल्भः, प्रणयकलहकुपितकामिनी प्रसादनोपाय चतुरः गजतुरगपुरूषस्त्री लक्षणाभिज्ञः, सकल भूतलरत्न भतोऽयं वैशम्पायनो नाम शुकः।

5. सन्दर्भपुरस्सरं व्याख्यायताम् -

यत्र च मलिनता हर्विधूमेषु न चरितेषु, मुखरागः

शुकेषु न कोपेषु, तीक्ष्णता कुशाग्रेषु न स्वभावेषु,

चञ्चलता कदलीदलेषु, न मनः सु, ..........स्तनस्पर्शो

होम धेनुषु न कामिनीषु, भ्रान्तिरनल प्रदक्षिणासु

न शास्त्रेषु, ....... रामानुरागो रामायणेन न यौवनेन,

मुखभङ्गविकारो जरया न धनाभिमानेन।

**तृतीय वर्ग ः** 15

6. सन्दर्भपुरस्सरं व्याख्यां कुरू।

अहो! मोहप्रायमेषां जीवितम्, साधुजनविगर्हितञ्च चरितम् , तथाहि-पुरूषापिशितोपहारे धर्मबुद्धिः, आहारः। साधुजनविगर्हितोमधुमांसादिः, श्रमोमृगया, शास्त्रं शिवारूतम्,